एकीभूय च सर्व्वेषां तेजसां राशिमूर्त्तिमान् ।
तं वस्तुं दर्शयित्वा च शिशुरूपो बभूव ह ॥
साम्प्रतं सूतिकागारादाजगाम तवालयम् ।
अयोनिसम्भवश्चायमाविर्भूतो महीतले ॥
वायुपूर्णं मातृगर्भं कृत्वा च मायया हरिः ।
आविर्भूय वसुं मूर्त्तिं दर्शयित्वा जगाम ह ॥
युगे युगे वर्णभेदो नामभेदोऽस्य वल्लव ! ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥
शुक्लवर्णः सत्ययुगे सुतीव्रतेजसा वृतः ।
त्रेतायां रक्तवर्णोऽयं पीतोऽयं द्वापरे विभुः ॥
कृष्णवर्णः कलौ श्रीमांस्तेजसां राशिरेव च ।
परिपूर्णतमं ब्रह्म तेन कृष्ण इति स्मृतः ॥"* ॥
तस्य कृष्णनाम्नो व्युत्पत्तिर्यथा,—
"ब्रह्मणो वाचकः कोऽयमृकारोऽनन्तवाचकः ।
शिवस्य वाचकः षश्च णकारो धर्म्म एव च ॥
अकारो विष्णोर्वचनं श्वेतद्वीपनिवासिनः ।
नरनारायणोऽस्य विसर्गो वाचकः स्मृतः ॥
सर्व्वेषां तेजसां राशिः सर्व्वमूर्त्तिस्वरूपकः ।
सर्व्वाधारः सर्व्वबीजस्तेन कृष्ण इति स्मृतः ॥
कृषिर्निर्व्वाणवचनो णकारो मोक्ष एव च ।
अकारो दातृवचनस्तेन कृष्ण इति स्मृतः ॥
कृषिर्निश्चेष्टवचनो णकारो भक्तिवाचकः ।
अकारो दातृवचनस्तेन कृष्ण इति स्मृतः ॥
कर्म्मनिर्म्मूलवचनः कृषिर्णो दास्यवाचकः ।
अकारः प्राप्तिवचनस्तेन कृष्ण इति स्मृतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।१३ ४५—६२॥
तस्य नामान्तराणां व्युत्पत्तिर्यथा,—
"राम नारायणानन्त मुकुन्द मधुसूदन ।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥
इत्येकादश नामानि पठेद्वा पाठयेद्यदि ।
जन्मकोटिसहस्राणां पातकादवमुच्यते ॥
राशब्दो विश्ववचनो मश्चापीश्वरवाचकः ।
विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः ॥
रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमाया रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं भवेत् ॥
तत्फलं लभते नूनं रामोच्चारणमात्रतः ॥
सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः ।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः ॥
नाराश्च कृतपापाश्चाप्ययनं गमनं स्मृतम् ।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः ॥
सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥
नारञ्च मोक्षणं पुण्यमयनं ज्ञानमीप्सितम् ।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः प्रभुः ॥
नास्त्यन्तो यस्य वेदेषु पुराणेषु चतुर्षु च ।
शास्त्रेष्वन्येषु योगेषु तेनानन्तं विदुर्बुधाः ॥*॥
मुकुमव्ययमान्तञ्च निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तद्ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥*॥
सूदनं मधुदैत्यस्य यस्मात् स मधुसूनः ।
इति सन्तो वदन्तीशं वेदे भिन्नार्थमीप्सितम् ॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे ।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदनः ॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु ।
करोति सूदनं यो हि स एव मधुसूदनः ॥*॥
कृषिरुत्कृष्टवचनो णश्च सद्भक्तिवाचकः ।
अश्चापि दातृवचनः कृष्णं तेन विदुर्बुधाः ॥
कृषिश्च परमानन्दे णश्च तद्दास्यकर्म्मणि ।
तयोर्दाता च यो देवस्तेन कृष्णः प्रकीर्त्तितः ॥
कोटिजन्मार्ज्जिते पापे कृषिः क्लेशे च वर्त्तते ।
भक्तानां णश्च निर्व्वाणे तेन कृष्णः प्रकीर्त्तितः ॥
नाम्नां सहस्रं दिव्यानां त्रिरावृत्त्या तु यत्
फलम् ।
एकावृत्त्या तु कृष्णस्य तत् फलं लभते नरः ॥
कृष्णनाम्नः परं नाम न भूतं न भविष्यति ।
सर्व्वेभ्यश्च परं नाम कृष्णेति वैदिका विदुः ॥
कृष्ण कृष्णेति हे गोपि यस्तं स्मरति नित्यशः ।
जलं भित्त्वा यथा पद्मं नरकादुद्धरत्ययम् ॥
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति सद्यस्तु महापातककोटयः ॥
अश्वमेधसहस्रेभ्यः फलं कृष्णजपस्य च ।
वरं तेभ्यः पुनर्ज्जन्म नातो भक्तः पुनर्भवः ॥
सर्व्वेषामपि यज्ञानां लक्षाणि च व्रतानि च ।
तीर्थस्नानानि सर्व्वाणि तपांस्यनशनानि च ॥
वेदपाठसहस्राणि प्रादक्षिण्यं भुवः शतम् ।
कृष्णनामजपस्यास्य कलां नार्हन्ति षोड़शीम् ॥
तेषां भोगाद्भवेत् स्वर्गफलञ्च सुचिरं नृणाम् ।
स्वर्गादवश्यं पुंसश्च जपकर्त्तुर्हरेः प्रदम् ॥*॥
के जले सर्व्वदेहेऽपि शयनं यस्य चात्मनः ।
वदन्ति वैदिकाः सर्व्वे तं देवं केशवं परम् ॥
कंसश्च पातके विघ्ने रोगे शोके च दानवे ।
तेषामरिर्निहर्त्ता यः स कंसारिः प्रकीर्त्तितः ॥
रुद्ररूपेण संहर्त्ता विश्वानामपि नित्यशः ।
भक्तानां पालको यो हि हरिस्तेन प्रकीर्त्तितः ॥
कुण्ठं जड़ञ्च विश्वौघं विशिष्टञ्च करोति या ।
विकुण्ठां प्रकृतिं वेदाश्चत्वारश्च वदन्ति ताम् ॥
गुणाश्रयेण भगवान् तस्यां जातः स्वसृष्टये ।
परिपूर्णतमं तेन वैकुण्ठश्च विदुर्बुधाः ।*॥
वामो विपत्तौ नम्छेदे साक्षाद्देदेषु वर्त्तते ।
सुराणां विपदां छेत्ता वामनस्तेन कीर्त्तितः ॥
एवं नाम्नाञ्च सर्व्वेषां व्युत्पत्तिश्च श्रुतौ श्रुता ।
यथागमञ्च कथितं सर्व्वं जानाति माधवः ॥*॥

यशोदोवाच ।

वासुदेवश्च गोविन्दो मुरारिर्माधवस्तथा ।
नाम्नां चतुर्णां व्युत्पत्तिं वद चान्यच्च तिष्ठतु ॥

राधिकोवाच ।

वसुः सर्व्वनिवासश्च विश्वानि यस्य लोमसु ।
स च देवः परं ब्रह्म वासुदेव इति स्मृतः ॥१॥
गाश्च विश्वसमूहश्च विन्दते योऽवलीलया ।
ज्ञानसिन्धुसमूहश्च गोविन्दस्तेन कीर्त्तितः ॥२॥
मुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम् ।
दैत्यभेदेऽप्यरिस्तेषां मुरारिस्तेन कीर्त्तितः ॥३॥
मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।
नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । १११ ।
१९—५२ ; ५५—६० ॥ तस्य भूषणास्त्रस्वरूपं
यथा —

श्रीमैत्रेय उवाच ।

"भूषणास्त्रस्वरूपेण यथैतदखिलं जगत् ।
बिभर्त्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि ।

श्रीपराशर उवाच ।

नमस्कृत्याप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वशिष्ठेन ममाभवत् ॥
आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥
श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥
भूतादिमिन्द्रियादिञ्च द्विधाहङ्कारमीश्वरः ।
बिभर्त्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥
बलस्वरूपमत्यन्तजवेनान्तरितानिलम् ।
चक्रस्वरूपञ्च मनो धत्ते विष्णुः करस्थितम् ॥
पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसंघातो भूतमाला च वै द्विज ॥
यानीन्द्रियाण्यशेषाणि बुद्धिकर्म्मात्मकानि वै ।
शररूपाण्यशेषाणि तानि धत्ते जनार्द्दनः ॥
बिभर्त्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्म्मलम् ।
विद्यामयन्तु तज्ज्ञानमविद्याचर्म्मसंस्थितम् ॥
इत्थं पुमान् प्रधानञ्च बुद्ध्यहङ्कारमेव च ।
भूतानि च हृषीकेशे मनः सर्व्वेन्द्रियाणि च ।
विद्याविद्ये च मैत्रेय सर्व्वमेतत् समाश्रितम् ॥
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्ज्जितः ।
बिभर्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ॥
सविकारं प्रधानं यत् पुमांश्चैवाखिलं जगत् ।
बिभर्त्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः ॥
या विद्या या तथाविद्या यत् यच्चासदव्य-
यम् ।
तत् सर्व्वं सर्व्वभूतेशे मैत्रेय मधुसूदने ॥
कलाकाष्ठानिमेषादिदिनर्त्वयनहायनैः ।
कालस्वरूपो भगवानपरो हरिरव्ययः ॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम ! ।
महर्जनस्तपः सत्यः सप्त लोका इमे विभुः ॥
लोकात्ममूर्त्तिः सर्व्वेषां पूर्व्वेषामपि पूर्व्वजः ।
आधारः सर्व्वविद्यानां स्वयमेव हरिः स्थितः ॥
देवमानुषपश्वादिस्वरूपैर्ब्बहुभिर्विभुः ।
स्थितः सर्व्वेश्वरोऽनन्तो भूतमूर्त्तिरमूर्त्तिमान् ।
ऋचो यजूंषि सामानि तथैवाथर्व्वणानि च ।
इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः ॥
वेदाङ्गानि समस्तानि मन्वादिगदितानि च ।
शास्त्राण्यशेषाण्याख्यानान्यनुवादाश्च ये
क्वचित् ॥